॥ श्रीः ॥

श्रीसुरेश्वराचार्यकृतं

पञ्चीकरणवार्तिकम् ॥

अभिनवनारायणेन्द्रसरस्वतीविरचित वार्तिकाभरणाख्य व्याख्यासहितम्

PAÑCĪKARAṆA VĀRTIKAM

BY

ŚRĪ SUREŚVARĀCĀRYA

with the commentary

VĀRTIKĀBHARAṆAM

by

NĀRĀYAṆENDRA SARASVATĪ

1970

Sri Vani Vilas Press,
Srirangam, Tiruchirapalli-6.

Edited by

T. H. VISWANATHA SASTRI,
Nyāyaśiromaṇi; Vyākaraṇa-śiromaṇi; Vedānta Vidvān; formerly of the Government Oriental Manuscripts Library, Madras, now of the Oriental Manuscripts Library, Adyar, Madras.



CONTENTS

Foreword	... i-ii
Introduction	... i-iii
Pañcīkaraṇam by Śri Śamkara Bhagavatpāda	... 1-2
Pañcīkaraṇa Vārtikam by Śri Śureśvarācārya with eommentary	... 3-33
Index of verses	... i-ii

FOREWORD

Sri T. K. Balsubramania Iyer, of revered memory, the founder of Sri Vani Vilas Press, Srirangam, unearthed from among the manuscripts in the Tanjore Sarasvatī Mahāl Library, two unpublished works attributed to Śrī Sureśvarācārya, viz., *Vedāntasāra-Vārtikarāja-saṅgraham* and *Pañcīkaraṇa-Vārtikam* and published them as one booklet many decades ago. The latter is genuinely a work of Śrī Sureśvarācārya.

At the request of the Sringeri Sureśvarācārya Adhiṣṭhāna Jīrnoddhāra Mahotsava Committee and the Akhila Bharata Śaṁkara Seva Samiti, Śiromaṇi T. H. Viswanatha Sastri selected from the Govt. Oriental Manuscript Library, Madras, an instructive Samskrit commentary *Pañcīkaraṇavārtikam, known* as *Vārtikābharaṇam*, written by Śrī Nārāyanendra Sarasvatī. It is very lucid and will benefit all interested in Advaita philosophy. A detailed preface from the pen of Śrī T. H. Viswanatha Sastri, a learned Samskrit research scholar, has been added to it. The text with the commentary and the Preface, along with the text of Śrī Ādi-Śaṁkaracārya's *Pañcīkaraṇam*, has been issued as a supplement to the commemoration volume published by the above committee at the time of the Kumbhābhiṣekam at Sringeri. Finding that the supplement would be

serving a larger public if printed and issued as a separate booklet, the Śrī Vāni Vilās Syndicate Ltd., Srirangam applied for permission to the committee to do so and the committee has been kind enough to grant it. The syndicate expresses its gratitude to the committee for the same.

The importance of the work will easily be realised once it is read. It should be in the hands of every *āstika*, who seeks after Truth. It is priced moderately. The syndicate hopes that the public would make the best use of this booklet.

Srirangam
May, 1970

K. V. SUBBARATNAM,
Chairman, Sri Vani Vilas Syndicate Ltd.

PREFACE

Pañcikaraṇam is one of Śrī Śaṁkara Bhagavatpāda's *prakaraṇas* and, like the *Dakṣiṇamūrti aṣṭaka*, is very popular. The latter is the cream of advaita Vedānta, and the former elucidates the nature of *samādhi* and deep meditation on the *praṇava*. The two works have several commentaries, and are held worthy of recitation thrice a day. Śivanārāyaṇa Tīrtha emphasises this point in the concluding verses of his commentary:

मुहुर्मुहुः प्रियं शिष्ये संबोध्याह सुरेश्वरः ।
प्रमादस्तु न कर्तव्यः इत्यभिप्रेत्य सादरम् ॥

इमां विद्यां प्रयत्नेन योगी सन्ध्यासु सर्वदा ।
समभ्यसेदिहामुत्र भोगानासक्तधीः सुधीः ॥

There is another *Pañcikaraṇam* in the Government Manuscript Library, Madras, (D. No 4636), a much later work composed by Abhinava Sadāśivendra, a disciple of Rāmacandrendra.

The following are the commentaries on Bhagavatpāda's *Pañcikaraṇam*:—

1. *Pañcikaraṇa Vārtika* by Śrī Sureśvarācārya.
2. *Pañcikaraṇa Vivaraṇam* by Ānandagiri (Ānandajñana) with a sub-commentary called *Tattvacandrikā* by a disciple of Kṛṣṇa Tīrtha and Jagannātha Āśrama.
3. *Pañcikaraṇa bhāva prakāśikā* by Abhinava Nārāyaṇendra.
4. *Pañcikaraṇa Vivaraṇam* by Prajñānandayati
5. *Pañcikaraṇa Vyākhyā* (*Tātparya candrikā*) by Rāmananda Sarasvati

and 6. *Pāñcikaraṇa Vyākhyā* (*Ātmānusādhana*) commentator not known.

Śrī Sureśvara's *Pañcikaraṇa Vārtika* has the following commentaries:—

1. *Pañcikaraṇa Vārtika Vyākhyā-Vārtikābharanam* by Abhinava Nārāyaṇendra Sarasvati
2. *Vārtika Vivaraṇam* by Śivanārāyaṇānanda Tīrtha, a disciple of Śivarāmānanda — both in prose and verse.
3. *Pañcikaraṇa Vārtika Vyākhyā* (author not known).

Number one in the above list is the present publication. The text of the *Vartika* (consisting of 64 verses) has been published by the Śrī Vāṇī Vilās Press. Srirangam, along with another work, *Vedānta Sāra Vārtikarāja saṅgraham*, also, on doubtful grounds, attributed to Śrī Sureśvara.

The commentator Abhinava Nārāyaṇendra Sarasvati, was a disciple of Jñānendra Sarasvati, who was a disciple of Kaivalyendra Sarasvati. It is not known whether this Jñānendra was the same person who composed *Tattvabodhinī*, a commentary on Bhaṭṭoji Dikṣita's *Siddhānta Kaumudi*. Nothing more is known about Abhinava Nārāyaṇendra. Since he refers to Ānandagiri who belonged to the fourteenth century, he is a much later writer and may be assigned to the seventeenth century.

The other works of Abhinavanarāyanendra include *Pañcikaraṇa Vyākhyā-Abhinavāyaprakāśika* a direct commentary on Bhagavatpāda's *Pañcikaraṇam*. *Tikas* on *Aitareyōpariṣad bhāṣya*, *Cāndogyopaniṣad bhāṣya*, *Praśnopaniṣad bhāṣya*, *Muṇḍakopaniṣad bhāṣya*, *Kaṭhopaniṣad bhāṣya* and *Kenopaniṣad bhāṣya* and *Ānandalaharī*.

The *catalogus catalogorum* mentions two other persons bearing the name of Abhinava Nārāyaṇendra Sarasvati. One was the Guru of Paramaśivendra Sarasvati, and author of *Vedānta nāmaratnasāhasram* and *Śivagītātātparya prakāśikā*, and the other was the Guru of Śamkara Yati, author of *Subrahmaṇya bhujaṅga*.

The manuscripts used in editing this work are as under:— A paper manuscript written in Devanāgari script preserved in

the Government Oriental Manuscripts Library, Madras, under R. No. 2724 d. which was transcribed in 1918-19 from a manuscript of Śūlapāṇi Warrier of Tekkemaḍam, Trichur. It has been bound with three other works, *Kṣurikopaniṣad dīpikā*, *Atharvaśikhopaniṣad dīpikā* and *Gopalatāpini Upaniṣad dīpikā*. The press copy is based on this manuscript.

A manuscript D. No. 4641 in Telugu script contained in a palm leaf bundle. This was used for purposes of collation.

My thanks are due to the Curator, Government Oriental Manuscripts Library, Madras for kind permission to use the manuscripts and to the Akhila Bhārata Śaṁkara Sevā Samiti for affording the opportunity to edit and publish this work.

Madras,
March 1970.

T. H. VISWANATHAN



॥ पञ्चीकरणम् ॥

(श्रीमच्छंकरभगवत्पादाचार्यप्रणीतम्)

अथातः परमहंसानां समाधिविधिं व्याख्यास्यामः ॥

ओं सच्छब्दवाच्यमविद्याशबलं ब्रह्म । ब्रह्मणोऽव्यक्तम् । अव्यक्तात् महत् । महतोऽहंकारः । अहङ्कारात्पञ्चतन्मात्राणि । पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि । पञ्चमहाभूतेभ्योऽखिलं जगत् ॥

पञ्चानां भूतानामेकैकं द्विधा विभज्य स्वार्धभागं विहायार्धभागं चतुर्धा विभज्येतरेषु योजिते पञ्चीकरणं मायारूपदर्शनं । अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ॥

ओं पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं सर्वं विराडित्युच्यते । एतत्स्थूलशरीरमात्मनः । इन्द्रियैरर्थोपलब्धिर्जागरितम् । एतदुभयाभिमान्यात्मा विश्वः । एतत्त्रयमकारः ॥

अपञ्चीकृतपञ्चमहाभूतानि पञ्चतन्मात्राणि, तत्कार्यं च पञ्चप्राणाः दशेन्द्रियाणि मनो बुद्धिश्चेति सप्तदशकं लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते । एतत्सूक्ष्मशरीरमात्मनः । करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्न इत्युच्यते । तदुभयाभिमान्यात्मा तैजसः । एतत्त्रयमुकारः ॥

शरीरद्वयकारणमात्माज्ञानं साभासमव्याकृतमित्युच्यते । एतत् कारणशरीरमात्मनः । तच्च न सत्, नासत्, नापि सदसत् । न भिन्नम्, नाभिन्नम्, नापि भिन्नाभिन्नं कुतश्चित्, न निरवयवम्, न सावयवम्, नोभयम् । किं तु केवलब्रह्मात्मैकत्वज्ञानापनोद्यम् । सर्वप्रकारज्ञानोपसंहारे बुद्धेः कारणात्मनाऽवस्थानं सुषुप्तिः । तदुभयाभिमान्यात्मा प्राज्ञः । एतत्त्रयं मकारः ॥

अकार उकारे, उकारो मकारे, मकार ओंकारेऽहम्येव ॥

अहमात्मा साक्षी केवलश्चिन्मात्रस्वरूपः, नाज्ञानम्, नापि तत्कार्यम् । किं तु नित्यशुद्धबुद्धमुक्तसत्यस्वभावं परमानन्दाद्वयं प्रत्यग्भूतचैतन्यं ब्रह्मैवाहमस्मीत्यभेदेनावस्थानं समाधिः । 'तत्त्वमसि' 'ब्रह्माहमस्मि' 'प्रज्ञानमानन्दं ब्रह्म' 'अयमात्मा ब्रह्म' इत्यादिश्रुतिभ्यः ॥ इति पञ्चीकरणं भवति ॥

पञ्चीकरणं संपूर्णम् ॥

॥ श्रीः ॥

॥ पञ्चीकरणवार्तिकम् ॥

(वार्तिकाभरणसहितम्)

श्रीगणपतये नमः ॥ अविघ्नमस्तु ॥

[1] ओं-नत्वा श्रीदक्षिणामूर्तिं ज्ञानेन्द्रगुरुरूपिणम् ।
विवृणोमि यथान्यायं पञ्चीकरणवार्तिकम् ॥

इह खलु परमेश्वराराधनार्थमनुष्ठितैर्नित्यादिकर्मभिः परिशुद्धान्तःकरणानां तत एव नित्यानित्यवस्तुविवेकेहामुत्रार्थभोगविरागशमादिसाधनसम्पन्नमुमुक्षुत्वाख्यसाधनचतुष्टयवतां ब्रह्मजिज्ञासूनां परित्यक्तसर्वकर्मणां परमहंसपरिव्राजकानां श्रवणमननिदिध्यासनपराणामरुणोपनिषदि [2] 'सन्धि समाधावात्मन्याचरे'दिति समाधिर्विहितः । स च समाधिरोङ्कारेण कर्तव्य इति ओमित्यात्मानं युञ्जीतेति तैत्तिरीयश्रुतौ विहितः । युज समाधाविति स्मृतेः । स समाधिरोङ्कारेण कथं कर्तव्य इत्याकांक्षायां तं प्रकारं वक्तुं भगवता भाष्यकारेण पञ्चीकरणं नाम प्रकरणमुपदिष्टम् । तत्प्रकरणं व्याचिख्यासुर्भगवान् वार्तिककारश्चिकीर्षितस्योक्तानुक्त दुरुक्तचिन्तात्मकस्य तद्व्याख्यान[3]स्य वार्तिकस्य निर्विघ्नपरिसमाप्तिप्रचयगमनसिद्धयर्थं,

ओङ्कारश्चाथशब्दश्च द्वावेव ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गळिकावुभौ ॥

---

1. D. 4641 अ. श्लोकोऽयं न दृश्यते ।
2. अ. [अरण्योपनिषदा]
3. अ. रूप- ।

इति स्मृतेरोङ्कारोच्चारणं [1] तदर्थतत्त्वानुस्मरणात्मकं मङ्गलमाचरन् प्रकरणस्यार्थं संक्षेपेण श्रोतृबुद्धिसौकर्यार्थं कथयति —

ओङ्कारस्सर्ववेदानां सारस्तत्त्वप्रकाशकः ।
तेन चित्तसमाधानं मुमुक्षूणां प्रकाश्यते ॥ १ ॥

ओङ्कार इति । तेनोङ्कारेण चित्तसमाधानं प्रकाश्यत इति सम्बन्धः । चित्तसमाधानं ब्रह्मात्माभेदाकारतयावस्थानं, अखण्डब्रह्माकारवृत्तिरूपेण परिणामः, न तु शास्त्रान्तरप्रसिद्धचित्तवृत्तिनिरोध इत्यर्थः । अहं ब्रह्मास्मीत्यभेदेनावस्थानं समाधिरिति मूले वक्ष्यमाणत्वात् । 'समाधिस्संविदुत्पत्तिः परजीवैकतां प्रती'ति स्मृतेश्च । [2]ततश्चित्तस्याखण्डाकारवृत्तिरूपं ज्ञानं येन प्रकारेणोङ्कारेण जायते स प्रकारः प्रकाश्यत इत्यर्थः । ओङ्कारस्य ज्ञानजननप्रकाश[3]सामर्थ्यमाह—**तत्त्वप्रकाशक इति** । तत्त्वमस्यादिवाक्यवन्महावाक्यविधया विधिमुखेन नेति नेतीति वाक्यवन्निषेधविधया च तत्त्वप्रकाशकत्वं तस्य श्रुतिस्मृतिप्रसिद्धमित्यर्थः ॥

ननु तत्त्वमस्यादिवाक्येभ्यः ओङ्कारस्य को वा विशेषः ? येन ओंकारेणैव चित्तसमाधानं प्रकाश्यते तत्राह — **सर्ववेदानां सार इति** । मृदिव घट-शरावादीनां, सर्ववेदानुस्यूततया कारणत्वात्तेषां सारः 'ओंकारेण सर्वा वाक् संतृण्णेति' श्रुतेरित्यर्थः । अयमाशयः — तत्त्वमस्यादिवाक्यानां मध्ये केनचित् वाक्येन चित्तसमाधानप्रकारे प्रकाशिते अप्रकाशितवाक्यान्तर [4]ध्यायिनां ततो वाक्यात् समाधानासिद्धेः वाक्यान्तरेष्वपि तत्प्रकाशयितव्यं स्यादिति यत्नगौरवं स्यात् । ओंकारेण तत्प्रकाशने तु तस्य सर्ववेदवाक्यसारत्वात् सर्वत्र वाक्ये समाधानप्रकारः [5]प्रकाश्यत इति न पृथक् कार्यः स्यात् । ओंकारेणैव सर्वेषां चित्तसमाधानसिद्धेश्च न यत्नान्तरं कार्यमिति वा लाघवमिति ॥

---

1. अ. तदर्थपरिसमाप्त्यर्थं । 2. अ. तच्चित्तस्य ।
3. अ. नास्ति । 4. अ. न्तराध्यायिनां । 5. अ. प्रकाशत ।

किं च वेदोच्चारणस्य पापनिवर्तकत्वस्मरणाल्लौकिकवाक्यापेक्षया वेदवाक्योच्चारणस्यार्थस्मरणद्वारा ज्ञानप्रतिबन्धककल्मषनिवर्तकत्वेन शीघ्रम-प्रतिबन्धज्ञानोत्पादकत्वं विशेष इति वक्तव्यम् । अर्थबोधकत्वस्योभयत्रापि तुल्यत्वेन प्रकारान्तरेणातिशयस्य वक्तुमशक्यत्वात् । एवं च सति ओंकारस्य सर्ववेदसारत्वेन सर्ववेदात्मकत्वात्तदुच्चारणस्य सर्ववेदोच्चारणत्वात्ततो बहुकल्मष-निवृत्त्या शीघ्रमप्रतिबन्धज्ञानं ततो भवति ॥

किं च, ओमित्यात्मानं युञ्जीतेत्यादिबहुश्रुतिषु तस्मिन्नादरदर्शनाच्च तेन[1] चित्तसमाधानं प्रकाशनीयमिति । तत्राधिकारिणमाह–**मुमुक्षूणामिति** ॥

अत्र चोङ्कारप्रकाश्यं तत्त्वं विषयः, मोक्षः काम्यमानत्वान्मुख्यं प्रयोजनं, चित्तसमाधानशब्दितं तत्त्वज्ञानमवान्तरप्रयोजनम्, प्रकरणस्य फलस्य च जन्यजनकभावस्संबन्धः, अधिकारिणः स्वकीयप्रयोजनकत्वं[2] प्रकरणेन संबन्धः, मुमुक्षुरधिकारीत्यनुबन्धचतुष्टयं प्रवृत्यङ्गमर्थादुक्तमिति द्रष्टव्यम् ॥ १॥

इह भगवता भाष्यकारेणाध्यारोपापवादाभ्याम् ओंकारेण प्रत्यग्ब्रह्मा-मेदप्रतिपत्तिप्रकारं दर्शयितुमधिष्ठानस्य वास्तवं रूपम् अध्यारोप्यप्रपञ्चस्य सृष्टिं च सिद्धवत्कृत्य अध्यारोपमात्रमनूदितम् ॥

वार्तिकाचार्यस्तु उक्तानुक्तद्विरुक्तचिन्तात्मकत्वाद्वार्तिकस्यानुक्तं तदुभयं वक्तुकामः आदावध्यारोपात्पूर्वमवस्थितमधिष्ठानात्मस्वरूपमाह—

आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।
तत्स्वमायासमावेशाद्धीजमव्याकृतात्मकम् ॥ २ ॥

आसीदेकमिति । ब्रह्म देशकालवस्तुपरिच्छेदशून्यं अत एव **एकं** सजातीयविजातीयस्वगतभेदशून्यं **परं** परमानन्दरूपं **नित्यमुक्तं** कालत्रयेऽपि

---

1 तेनैव समा 2 प्रयोजनजन

सर्वानर्थप्रपञ्चसंबन्धशून्यं सच्चिदानन्दात्मकं वस्त्वासीत्सृष्टेः प्रागित्यर्थः । 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं' 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्,' 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतिभ्यः इत्यर्थः । यद्यप्यद्वितीयस्य आसीदिति कालसंबन्धो न युक्तस्तथापि श्रोतृणां प्रतिपत्तिसौकर्यार्थं कालसंबन्धमारोप्योपदिशतीति बोध्यम् ॥

ननु जगदुपादानस्य कालत्रयेऽपि कथं तत्संबन्धशून्यत्वं तत्राह — **अविक्रियमिति** । निरवयवत्वेन विभुत्वेन च परिणामपरिस्पन्दयोरसंभवादुपादानत्वमपि न तस्यास्तीत्यर्थः । [1] कथं तर्हि तत्तेजोऽसृजतेत्यादिश्रुतिभिरुपादानत्वाभिधानं ब्रह्मण इत्याशंक्य तत्त्वतोऽन्यथाभावित्वलक्षणपरिणाम्युपादानत्वासंभवेऽपि मायया ऽतत्वतोऽन्यथाभावित्वलक्षणं विवर्तोपादानत्वं संभवतीत्याह — **तत्स्वमायेति** । स्वस्य ब्रह्मणः शक्तिभूता स्वस्मिन्नेवाध्यस्ता माया स्वमाया तस्याः समावेशः आध्यासिकतादात्म्यं तस्माद्बीजमुपादानमित्यर्थः । शुक्त्यादेर्विक्रियां विनापि रजताद्युपादानत्वदर्शनात् , अविक्रियस्यापि जगद्विवर्तोपादानत्वमविरुद्धमिति भावः ॥

ननु यत्र यत्कार्यं सूक्ष्मरूपेण वर्तते तदेव तस्य कार्यस्य बीजं, अन्यथा तन्तूनामपि घटं प्रति [2] कारणत्वं स्यात्तथा च नित्यमुक्ते ब्रह्मणि प्रागुत्पत्तेः जगतः सूक्ष्मरूपासंभवात् कथं तद्बीजत्वमत आह — **अव्याकृतात्मकमिति** । [3] स्वभावतो नित्यमुक्तस्य सूक्ष्मकार्याश्रयत्वासंभवेऽपि मायायां तत्संभवात् तद्द्वाराऽव्याकृतात्मकमनभिव्यक्तनामरूपात्मकजगदाश्रयः । 'तद्वेदं तर्हि अव्याकृतमासीत्तन्नामरूपाभ्या'मिति श्रुतेः । अतो बीजत्वं युक्तमित्यर्थः ॥ २ ॥

एवं ब्रह्मणः प्रपञ्चोपादानत्वमुपपाद्येदानीं तस्मिञ्जगत अध्यारोपार्थं तत्सृष्टिमाह —

1, तर्हि कथं 2. बीजत्वं 3. स्वतो

तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम्।
स्पर्शात्मकस्ततो वायुस्तेजो रूपात्मकं ततः॥ ३॥

आपो रसात्मिकास्तस्मात्ताभ्यो गन्धात्मिका मही।

[1]**तस्मादिति।** तस्य स्थूलाकाशवैलक्षण्यमाह — **शब्दतन्मात्ररूपकमिति।** शब्द एष तस्मिन्नाकाशे मात्रा मीयते न त्ववकाशदातृत्वशान्तत्वघोरत्वादयो यस्मिन् तच्छब्दतन्मात्रं, तदेव रूपं यस्य गुणगुणिनोरभेदात्। तदा शब्दमात्रमेव गम्यते। अवकाशदानादिव्यवहारविशेषादयो न सन्ति यस्मिन् तत्सूक्ष्ममाकाशमित्यर्थः। तदुक्तं विष्णुपुराणे —

तस्मिंस्तस्मिंश्च सा मात्रा तेन तन्मात्रता स्मृता।
न शान्ता नापि ते घोरा न मूढास्ते विशेषतः॥

इति। स्पर्शात्मक इत्यादावेवमेव योज्यम्॥

तत्तद्भूतानामसाधारणगुणान् पूर्वपूर्वकारणगुणानुस्यूत्या प्राप्तगुणान्तराणि च संगृह्याह —

शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत्॥ ४॥

शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज उच्यते।
शब्दस्पर्शरूपरसैः गुणैरापश्चतुर्गुणाः॥ ५॥

शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही।

शब्दैकगुणमिति। पूर्वपूर्वभूतभावमापन्नस्यैव ब्रह्मण उत्तरोत्तरभूतोपादानत्वात् पूर्वपूर्वगुणानुस्यूतिरुत्तरस्मिन्न्याय्येति भावः॥

सूक्ष्मभूतानामुत्पत्तिमुक्त्वा तेषां कार्यमाह —

---

1. तस्मादित्यादिना।

तेभ्यः समभवत् [1] भूतं लिङ्गं सर्वात्मकं महत् ॥ ६ ॥

तेभ्य इति । लिङ्गशरीरं च ज्ञानेन्द्रियाणि पञ्चैवेत्यादिना वक्ष्यमाणं । ननु इन्द्रियाणि अहंकारकार्याणि, प्राणास्तु करणानां सामान्यवृत्तिरिति सांख्याः पौराणिकाश्चाहुः । तत्कथं भूतकार्यत्वं अत आह—**भूतमिति** । भूतात्मकं तत्कार्यमित्यर्थः । 'अन्नमयं हि सोम्य मनः' इत्यादिश्रुतेश्चक्षुरादीनां तेजआदिभूतैः उपचयदर्शनात् तेजआदिभूतग्राहकत्वाच्च भौतिकत्वमित्यर्थः । **सर्वात्मकमिति** । हिरण्यगर्भोपाधिभूतस्य समष्टिलिङ्गशरीरस्य सर्वव्यष्टि-लिङ्गशरीरव्यापित्वात् सर्वात्मकत्वमित्यर्थः ॥

यद्वा वैशेषिकादयस्तु चक्षुरादीन्द्रियाणि भौतिकान्येव; तानि शरीरेण सह जायन्ते, सहैव नश्यन्ति । न तु शरीरान्तरसंचारि चक्षुरादिकरणसङ्घातरूपं लिङ्गं नाम किंचिदस्ति । मन एव तु केवलं शरीरान्तरसंचारीत्याहुः । तन्मतं निराकरोति—**सर्वात्मकमिति** । क्रमेण प्रतिपद्यमानदेवादिसर्वशरीरेषु प्रविश्य तेषामात्मतया वर्तमानमित्यर्थः । केवलस्य व्यापकस्यात्मनः स्वत उत्क्रान्त्यादीनामसंभवात्, 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इति श्रुतेश्च, 'तदापीतेः संसारव्यपदेशादिति' न्यायाच्च करणसमुदायरूपमात्मन उत्क्रान्त्याद्युपधिभूतं लिङ्गं शरीरान्तरसंचारीति अङ्गी-कर्तव्यमित्यर्थः ॥

अत्रेदमवधेयम्— मायायास्त्रिगुणात्मकत्वात् तत्कार्याणि भूतान्यपि तादृशान्येव । अत्र भूतानां सात्विकांशेभ्यः प्रत्येकं श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि जायन्ते । तेभ्यो मिलितेभ्यः पञ्चभ्यो मनोबुद्ध्यहंकारचित्तात्मकमन्तःकरणं जायते । तेषामेव राजसांशेभ्यः प्रत्येकं कर्मेन्द्रियाणि वागादीनि पञ्च क्रमेण जायन्ते । तेभ्य एव मिलितेभ्यः प्राणादिपञ्चवृत्तिकः प्राणो जायते । तत्र चित्ताहंकारयोर्मनोबुद्ध्योरन्तर्भावेनान्तःकरणस्य द्वैविध्ये सति ज्ञानेन्द्रियपञ्चकं,

---

1. सूत्रं

कर्मेन्द्रियपञ्चकं, वृत्तिभेदेन पञ्च प्राणाः, मनो बुद्धिश्चेति सप्तदशकं लिङ्गं तेभ्यस्तमभवदिति। एवमेव समष्टिलिङ्गशरीरं हिरण्यगर्भोपाधिभूतं गोव्यक्तिषु गोत्वमिव व्यष्टिलिङ्गेष्वनुस्यूतं जायते। इयांस्तु विशेषः —

कृत्स्नब्रह्माण्डकारणतयाऽनुस्यूतेभ्यः सात्विकेभ्यः सूक्ष्मभूतेभ्य एकैकतः समष्टिज्ञानेन्द्रियाणि, समुदितेभ्यस्तेभ्य एव समष्टयन्तःकरणं, एवं राजसेभ्यः कर्मेन्द्रियाणि प्राणाश्च जायन्ते। समष्टिलिङ्गारंभकतया तदनुस्यूतेभ्यः कृत्स्नेभ्यः सात्विकादिभूतेभ्यः व्यष्टिकरणानीति। अत एव सगुणब्रह्मोपासकस्य समष्टयपरिच्छिन्नसगुणब्रह्मभावेन परिच्छेदाभिमाने निवृत्ते व्यष्टिलिङ्गं समष्टिलिङ्गतां प्रतिपद्यते। ततश्च हिरण्यगर्भोपाधिलिङ्गाभिमानेन हिरण्यगर्भता-प्राप्तिरिति तत्र तत्र भाष्यकारादिभिरुच्यमानं संगच्छते। अंशकार्यस्य अंशिकार्यान्तर्भावादिति॥ ६॥

एवं लिङ्गशरीरवत्तेभ्य एव भूतेभ्यः पञ्चीकरणेन स्थूलतामापन्नेभ्यः समष्टिव्यष्टिस्थूलशरीरं जातमित्याह —

ततः स्थूलानि भूतानि पञ्च तेभ्यो विराडभूत्।
पञ्चीकृतानि भूतानि स्थूलानीत्युच्यते बुधैः॥ ७॥

तत इति। सूक्ष्मेभ्यो भूतेभ्यः स्थूलत्वाविष्टवेषेण जातानि स्थूलानि भूतानि। तेभ्यो विराट् स्थूलं शरीरं द्विप्रकारमपि अभूदित्यर्थः। अत्रापि भूतेभ्योंशिभ्योऽण्डं तदंशेभ्यः पिण्डमिति उपास्यवैश्वानरात्मकत्वप्राप्तिः पूर्वोक्तरीत्या द्रष्टव्या। सूक्ष्मभूतेभ्यः भिन्नानि स्थूलानि जातानीति भ्रमं वारयति — **पञ्चीकृतानीति**। तान्येव पञ्चीकृतानि सन्ति स्थूलानीत्यर्थः॥

पञ्चीकरणप्रकारमाह —

पृथिव्यादीनि भूतानि प्रत्येकं विभजेद्द्विधा ।
एकैकं भागमादाय चतुर्धा विभजेत्पुनः ॥ ८ ॥

एकैकं भागमेकस्मिन् भूते संवेशयेत्क्रमात् ।
ततश्चाकाशभूतस्य भागाः पञ्च भवन्ति हि ॥ ९ ॥

वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमादिशेत् ।
पञ्चीकरणमेतत्स्यादित्याहुस्तत्ववेदिनः ॥ १० ॥

पृथिव्यादीनीति । एकैकं भूतं द्वेधा विभज्य तयोरेकं चतुर्धा विभज्य चतुरो विभागान् तत्तद्व्यतिरिक्तभूतचतुष्टये योजयेत् । ततश्च स्वांशोऽर्धमितरभूतानामंशाश्चत्वारोपि मिलित्वाऽर्धमिति एकैकं भूतं पञ्चात्मकं संपद्यत इत्यर्थः । **वाय्वादीति** । वाय्वादिभागाश्चत्वार आकाशभागोऽर्धं च मिलित्वा आकाशभूतस्य भागाः पञ्चेति पूर्वेण अन्वयेन योज्यम् । **वाय्वादिष्विति** । वायुभागोऽर्धं भूतान्तराणां चतुर्णां भागाश्चत्वारस्ततश्च वायोर्भागाः पञ्च भवन्तीत्येवं क्रमेण सर्वत्रातिदिशेदित्यर्थः ॥

अत्र केचिद्वाचस्पतिमिश्रमतानुसारिणः पञ्चीकरणं यद्यपि संप्रदायसिद्धं तथापि युक्तिविरुद्धत्वात्त्रिवृत्करणमेवादरणीयं । पञ्चीकरणपक्षे पृथिव्यादिभागानां, आकाशवाय्वोः प्रवेशे रूपवत्त्वात्महत्त्वाच्च तयोश्चाक्षुषत्वं स्यात् । यद्याकाशादिभागानामाधिक्यादितरभागानां च स्वल्पत्वादधिकेन स्वल्पस्याभिभूतत्वात् 'वैशेष्यात्तु तद्वादस्तद्वाद' इति न्यायेन चाक्षुषत्वाभावः, तर्हि आकाशादौ पृथिव्यादिभागकल्पना व्यर्था, तेषां व्यवहारागोचरत्वात् । अथापि श्रुतिसिद्धत्वादेव कल्प्यत इति यद्युच्येत, तथापि त्रिवृत्करणमेव श्रुतिसिद्धं, 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति' श्रुतेः । न पञ्चीकरणं तच्छ्रुतेरभावादित्याहुः । तत्राह — **इत्याहुस्तत्ववेदिन इति** । श्रुतिस्मृतिन्यायतत्त्ववेदिन इत्यर्थः ।

श्रुतिस्तावदाथर्वणे 'पृथिवी च पृथिवीमात्रा च' इत्यादिना स्थूलसूक्ष्मभूतकथन-प्रस्तावे 'वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च' इति तयोरपि स्थूलसूक्ष्मभेदं दर्शयति । स्थूलत्वं च पञ्चीकृतत्वमेवान्यस्यासंभवात् । 'पञ्चीकृतानि भूतानि स्थूलानीत्युच्यते बुधैः' इत्युक्तत्वाच्च । स्मृतिरपि स्कान्दे ब्रह्मगीतासु पञ्चीकृत्य शिवाज्ञयेत्यादिः । न्यायश्च श्रुतौ त्रिवृत्करणोक्तिबलात्त्रिवृत्कृतानां स्थूल-व्यवहारानर्हत्वं गम्यते ; अन्यथा तदुक्तिवैयर्थ्यात् । अत्रिवृत्कृतभूतकार्याणा-मिन्द्रियादीनामतीन्द्रियत्वेन स्पष्टव्यवहारादर्शनाच्च त्रिवृत्करणमर्थवदिति वक्तव्यम् । एवं पञ्चीकरणाभावे आकाशवायुभ्यामपि स्पष्टावकाशदानादिस्थूलव्यवहारो न स्यादित्येवं श्रुतिस्मृतिन्यायादिभिः पञ्चीकरणमङ्गीकर्तव्यम् । त्रिवृत्करणश्रुतिस्तु, छान्दोग्ये भूतत्रयसृष्टिश्रुतिः यथा पञ्चभूतोपलक्षणार्था वियदधिकरणन्यायेन, तथा त्रिवृत्करणश्रुतिरपि पञ्चीकरणोपलक्षणार्था । चाक्षुषत्वापत्तिस्तु वैशेष्यात्तु तद्वाद इति न्यायेन अर्थभूयस्त्वादेव परिहृतेति भावः ॥ ८–१० ॥

एवमुपोद्घाततया सृष्टिमभिधाय नित्यमुक्ते आत्मनि अतस्मिंस्त-[1]द्बुद्धित्वेन मायाकार्यत्वेन च तस्य आरोपत्वं चोक्तम् । इदानीं तस्य ओङ्कारेणापवादसौकर्याय आरोपितस्य कृत्स्नस्य त्रैविध्यकरणार्थं पञ्चीकृते-त्याद्याचार्यवाक्यं व्याचष्टे — **पञ्चीकृतानीत्यादिना** ।

पञ्चीकृतानि भूतानि तत्कार्यं च [2]विराड्भवेत् ।
स्थूलं शरीरमेतत्स्यादशरीरस्य चात्मनः ॥ ११ ॥

विराट्शब्दार्थमाह — **स्थूलं शरीरमिति** । अनेन व्यष्टिसमष्टि-शरीरद्वयमप्युक्तम् । ननु तस्य स्थूलशरीराङ्गीकारे, अस्थूलमित्यादि-श्रुतिविरोध इत्याशङ्क्य वस्तुतः अशरीरस्य शरीरसंबन्धासम्भवं वदन् तस्य मृषात्वमाह — **अशरीरस्य चेति** । चोऽवधारणे । वस्तुतः कालत्रयेऽपि शरीरसम्बन्धरहितस्येत्यर्थः [3] ॥ ११ ॥

---

1. तद्रूपत्वेन । 2 विराड्भूत् 3. हितस्यैवेत्यर्थः ।

ननु इन्द्रियैरर्थोपलब्धिरिति मूलमनुपपन्नं । अद्वितीयात्मनि इन्द्रियादिभेदाभावात् । आरोपितस्य तस्य सत्त्वेऽपि इन्द्रियाणां जडानां स्वतः प्रवृत्त्यसंभवः । न चात्माऽसङ्गः तत्प्रवर्तको भवति । अतस्तेषां विषयसंबन्धाभावादर्थोपलब्धिर्न संभवतीत्याशङ्क्याह —

अधिदैवतमध्यात्ममधिभूतमिति त्रिधा ।
एकं ब्रह्म विभागेन भ्रमाद्भाति न तत्त्वतः ॥ १२ ॥

अधिदैवतमिति । अधिदैवतमित्यादिषु सप्तम्यर्थेऽव्ययीभावः । देवतासु विद्यमानं दिगादिकमधिदैवतम् । आत्मनि कार्यकरणसंघाते शरीरे विद्यमानं श्रोत्राद्यध्यात्मम् । भूतेषु विद्यमानं विषयभूतं शब्दादिकमधिभूतम् । 'तेभ्यः समभव' दिति वार्तिके भूतानामिन्द्रियाणां च सृष्टिः कण्ठरवेणोक्ता । इन्द्रियसृष्ट्युक्त्यैव समष्टीन्द्रियाभिमानिचैतन्यानामेव देवतात्वात् तत्सृष्टिरप्यर्थादुक्तेति त्रिविधस्याप्यात्मन्यध्यारोपो दर्शित इति भावः ॥ १२ ॥

एवं सति इन्द्रियैरर्थोपलब्धिरिति वाक्यमुपपन्नं, तेन देवानां इन्द्रियप्रवर्तकत्वोपपत्तिरित्याह —

इन्द्रियैरर्थविज्ञानं देवतानुग्रहान्वितैः ।
शब्दादिविषयं ज्ञानं तज्जागरितमुच्यते ॥ १३ ॥

इन्द्रियैरिति । एवं सति देवतानुग्रहान्वितैरिन्द्रियैरर्थविज्ञानं जायते । तत् ज्ञानं जागरितमुच्यते इत्येवं वाक्यभेदेन ज्ञानपदद्वयस्या[1]न्वयो द्रष्टव्यः । यद्वा, इन्द्रियजन्यज्ञानम्, अन्यत् शास्त्रानुमानादिजन्यं ज्ञानं च सर्वं जागरितमिति ज्ञानपदद्वयस्यापुनरुक्तिः । अत्रोपलब्धिरित्युक्ते तुरीये गतः, अतः **अर्थेति** । **विषयोपलब्धिरित्यर्थः** । सुषुप्ते अज्ञानस्य विषयस्योपलब्धेरर्थपदं शब्दादिपरत्वेन व्याख्यातं **शब्दादिविषयमित्यनेन** । तथापि स्वप्ने वासनारूपशब्दाद्यर्थोपलब्धे-

1. स्याप्य ।

स्सत्वात् अतिव्याप्तिवारणाय इन्द्रियैरित्युक्तम्। न च तत्रापि इन्द्रियाणि दृश्यन्ते इति वाच्यं तेषां वासना[1]रूपत्वात्। न च वासनारूपैरपि तैरर्थोपलब्धिस्तत्रास्तीति वाच्यम् — वासनारूपाणां तेषामर्थानामिवाविषयत्वेन[2] साक्षिणा [3]भास्यमानत्वमेव न तूपलब्धौ करणत्वं। तत्प्रतीतिस्तु जाग्रत्काले करणत्वप्रतीतेः तद्भ्रमनामात्रं देवतानुग्रहाभावेन मुख्यकरणत्वाभावादित्याशयेन देवतानुग्रहान्वितैरित्युक्तम्॥

नचैवमपि मनः करणं तत्रास्तीति वाच्यं तस्येन्द्रियत्वाभावात् 'मनस्सवेन्द्रियाणिच' इत्यादिश्रुतौ इन्द्रियेभ्यः पृथग्गणनात्। अत एव श्रुतेरिन्द्रियत्वाभावनिश्चयात् 'मनःषष्ठानीन्द्रियाणि' इत्यत्र विजातीयेनैव संख्यापूरणं कार्यं। यजमानपञ्चमा इडां [4] प्राश्येत्यत्रानृत्विजापि विजातीयेन यजमानेन संख्यापूरणदर्शनात्। सजातीयेनैव संख्यापूरणन्यायस्तु गुहां प्रविष्टाविति अधिकरणसिद्धसन्देहस्थल एव, न तु मानान्तरेण विजातीयत्वनिश्चयस्थलेऽपीति भावः। स्वप्ने मनस अर्थोपलब्धि प्रत्युपादानत्वेन करणत्वाभावाच्च न तदादायातिव्याप्तिरिति॥

न चैवमपि समाधिमूर्छयोरव्याप्तिः। तत्रेन्द्रियैरुपलब्ध्यभावात् तयोर्जागरणत्वादिति वाच्यं, मूर्छायाः 'मुग्धेऽर्धसम्पत्तिः परिशेषा'दिति न्यायेनाजागरणत्वात्, समाधेस्तुरीयावस्थात्वेन अजागरणत्वाच्चेति॥ १३॥

इदानीमध्यात्मादिविभागं सुखप्रतिपत्त्यर्थं विविच्य दर्शयति — क्षेत्रमित्यादिना ईश्वरोऽत्राधिदैवतमित्यन्तेन।

श्रोत्रमध्यात्ममित्युक्तं श्रोतव्यं शब्दलक्षणम्।
अधिभूतं तदित्युक्तं दिशस्तत्राधिदैवतम्॥ १४॥

---

1. मात्र।
2. मिव विषयत्वेन।
3. भास्यत्वादेत्र।
4. भक्षयन्तीत्यत्र।

अत्राधिभूतमिति तत्तदिन्द्रियविषय उच्यते । शब्दस्वरूपं श्रोत्रेन्द्रियस्य विषय इत्यर्थः । एवं सर्वत्र योज्यम् ।

दिश इति । दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नित्यादिश्रुत्या दिगादीनामधिष्ठातृदेवतात्वावगमात्तेषु तथात्वमङ्गीकार्यमित्यर्थः एतेन जीवाधिष्ठितानामेवेन्द्रियाणां प्रवृत्त्युपपत्तेस्तदधिष्ठात्र्यो देवता न सन्तीति वदन्तो वैशेषिकादयो निरस्ताः । श्रुतिविरोधादसंगस्य जीवस्याधिष्ठातृत्वानुपपत्तेः । यद्यपि श्रुतौ अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादिना वागग्न्यादिक्रमेणाध्यात्मादिविभाग उक्तः तथापि तदुत्पादकतद्ग्राह्यभूतक्रमेण तत्रापि ज्ञानेन्द्रियपूर्वकत्वात् कर्मेन्द्रियप्रवृत्तेः तदुत्पादकग्राह्यभूतक्रमेणाध्यात्मादिक्रम इहोक्तः ॥ १४ ॥

त्वगध्यात्ममिति प्रोक्तं स्प्रष्टव्यं स्पर्शलक्षणम् ।
अधिभूतं तदित्युक्तं वायुस्तत्राधिदैवतम् ॥ १५ ॥

वायुरिति । यद्यपि 'ओषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशन्निति' श्रुतौ ओषधिवनस्पतीनां त्वग्देवतात्वमुक्तम् । तथापि तेषां देवतात्वाप्रसिद्धेस्तेषामधिष्ठाता वायुरेव ओषध्यादिशब्देनोक्त इति मत्वा इह वायुरित्युक्तम् । वृक्षाणां वायव्यत्वं च श्रुत्यादिप्रसिद्धमिति भावः ॥

चक्षुरध्यात्ममित्युक्तं द्रष्टव्यं रूपलक्षणम् ।
अधिभूतं तदित्युक्तमादित्योऽत्राधिदैवतम् ॥ १६ ॥

जिह्वाध्यात्मं तथाऽऽस्वाद्यमधिभूतं रसात्मकम् ।
वरुणो देवता तत्र जिह्वायामधिदैवतम् ॥ १७ ॥

जिह्वेति । रसात्मकमास्वाद्यमधिभूतमित्यन्वयः । वरुणो वा तं गृह्णातीत्यादौ व्याधिविशेषे वरुणशब्दप्रयोगात् तद्व्यावृत्त्यर्थं देवतारूपो वरुणो-

ऽधिदैवतमित्युक्तम् । वरुणस्याधिष्ठातृत्वात् रसस्य चाबात्मकत्वात् 'शन्नो मित्रश्शं वरुणः' इत्यत्र [1] देवतानुगतस्य गणनाच्च तत्र देवतेति भावः ॥

घ्राणमध्यात्ममित्युक्तं घ्रातव्यं गन्धलक्षणम् ।
अधिभूतं तदित्युक्तं [2] पृथिव्यत्राधिदैवतम् ॥ १८ ॥

घ्राणेन्द्रियस्य पार्थिवत्वात् पृथिव्यभिमानिदेवतायास्तत्र देवतात्वमुचितमिति **पृथिव्यत्राधिदैवत**मित्युक्तम् । यद्वा 'दिग्वातार्कप्रचेतोश्वीति' संप्रदायश्लोके अश्विनोर्घ्राणाधिदेवतात्वोक्तेः, बडवाभूतसूर्यपत्नीनासिकाभ्यां निर्गतत्वेन पुराणप्रसिद्धेश्च तयोरेवाधिदैवतत्वौचित्याच्च इह पृथिवीशब्देन तावेवोक्तौ । अथवा इमौ मनुष्यचरावित्यत्र तयोर्मनुष्यवत् पृथिवीसम्बन्धश्रवणात् । यद्यपि 'वायुः प्राणो भूत्वा नासिके प्राविश' दित्यत्र वायोर्देवतात्वमुक्तं तथापि नासिकासंचारिश्वासरूपवायोर्गन्धग्रहणसहकारित्वमात्रेण तथोक्तम् । वस्तुतस्तु तत्र वायुशब्देन तत्सहचारी पूर्वोक्तदेवतैव ग्राह्येति न विरोधः ॥ १८ ॥

वैशेषिकादयः — कर्मेन्द्रियाणि न सन्त्येव हस्ताद्यवच्छिन्नात्मनि प्रयत्नोत्पत्तौ ततः एव हस्तादौ व्यापारोत्पत्तिसंभवादित्याहुः । तदयुक्तं, अग्निर्वाग्भूत्वेत्यादिश्रुतिविरोधात् । कुणित्वादिप्रापककर्मप्रतिबद्धेन्द्रियाभावे कुणित्वंगुत्वाद्यसंभवापत्तेः । अन्यथा तत्तद्गोलकावच्छिन्नात्ममनस्संयोगादेव ज्ञानोत्पत्तिसंभवेन ज्ञानेन्द्रियाणामप्यभावप्रसङ्गाच्चेत्यभिप्रेत्य कर्मेन्द्रियेषूक्तं विभागमाह **वागित्यादिना** ।

वागध्यात्ममिति प्रोक्तं वक्तव्यं शब्दलक्षणम् ।
अधिभूतं तदित्युक्तमग्निस्तत्राधिदैवतम् ॥ १९ ॥

वागादयश्च यथाक्रमं राजसाकाशादिभूतकार्याणीति बोद्धव्यम् ॥१९॥

---

1. अ. इन्द्रिय देवता । 2. अश्विनावधिदैवतम् ।

हस्तावध्यात्ममित्युक्तमादातव्यं च यद्भवेत् ।
अधिभूतं तदित्युक्तमिन्द्रस्तत्राधिदैवतम् ॥ २० ॥

इन्द्र इति । 'इन्द्रो मे बले श्रितः' इति श्रुत्या इन्द्रस्य बलाधिष्ठातृत्वाद्बलस्य बाह्वोर्बलमिति श्रुत्या बाहुधर्मत्वादिन्द्रो हस्ताधिदैवतमित्यर्थः ॥

पादावध्यात्ममित्युक्तं गन्तव्यं तत्र यद् भवेत् ।
अधिभूतं तदित्युक्तं विष्णुस्तत्राधिदैवतम् ॥ २१ ॥

विष्णोर्विक्रमणादिकर्तृत्वाद्विक्रमणहेतुपादाधिष्ठातृत्वं तस्योचितमित्यर्थः ॥

पायुरिन्द्रियमध्यात्मं विसर्गस्तत्र यो भवेत् ।
अधिभूतं तदित्युक्तं मृत्युस्तत्राधिदैवतम् ॥ २२ ॥

उपस्थेन्द्रियमध्यात्मं रत्याद्यानन्दस्य कारणम् ।
अधिभूतं तदित्युक्तमधिदैवं प्रजापतिः ॥ २३ ॥

प्रजापतिरिति । यद्यपि 'आपो रेतो भूत्वा शिश्नं प्राविशन्नि'ति श्रुतावपां देवतात्वमुक्तम् ; तथाप्यत्राप्शब्देन तदुपलक्षितपञ्चभूतोपाधिकः प्रजापतिरेवोक्त इति भावः ॥ २२–२३ ॥

मन्तव्यबोद्धव्यादिकं सर्वं यद्यपि श्रोतव्यादिरूपमेव तथापि मन्तव्यत्वादिरूपेण श्रोतव्याद्यपेक्षया भेदमङ्गीकृत्य तेषां मनआदिविषयत्वमाह **मन्तव्यमित्यादिना** —

मनोऽध्यात्ममिति प्रोक्तं मन्तव्यं तत्र यद्भवेत् ।
अधिभूतं तदित्युक्तं चन्द्रस्तत्राधिदैवतम् ॥ २४ ॥

बुद्धिरध्यात्ममित्युक्तं बोद्धव्यं तत्र यद्भवेत् ।
अधिभूतं तदित्युक्तं अधिदैवं बृहस्पतिः ॥ २५ ॥

बृहस्पत्यादीनां तु बुद्ध्यादिदेवतात्वमागमादवगन्तव्यम्। इतरेषां तु 'अग्निर्वाग्भूत्वा' इत्यादिश्रुतौ तथात्वं स्पष्टमिति ॥ २४-२५ ॥

अहङ्कारस्तथाध्यात्ममहंकर्तव्यमेव च।
अधिभूतं तदित्युक्तं रुद्रस्तत्राधिदैवतम् ॥ २६ ॥

चित्तमध्यात्ममित्युक्तं चेतव्यं तत्र यद्भवेत्।
अधिभूतं तदित्युक्तं क्षेत्रज्ञोऽत्राधिदैवतम् ॥ २७ ॥

तमोऽध्यात्ममिति प्रोक्तं विकारस्तस्य यो भवेत्।
अधिभूतं तदित्युक्तमीश्वरोऽत्राधिदैवतम् ॥ २८ ॥

क्षेत्रज्ञः साक्षी; ईश्वरस्तु मायाप्रवर्तकः जगत्कारणमिति भेदः ॥

एवमध्यात्मादिविभागं प्रदर्श्य इन्द्रियैरर्थोपलब्धिर्जागरितमिति वाक्ये इन्द्रियग्रहणं करणोपलक्षणार्थमित्यभिप्रेत्य वदन् वाक्यार्थमुपसंहरति—

बाह्यान्तःकरणैरेवं देवतानुग्रहान्वितैः।
स्वं स्वं च विषयं ज्ञानं तज्जागरितमुच्यते ॥ २९ ॥

बाह्येति। अत्र ज्ञानमिति कर्मेन्द्रियव्यापाराणामुपलक्षणं, अन्यथा कर्मेन्द्रियस्यासंग्रहापातात् स्वरूपनिरूपणवैयर्थ्यं स्यादिति ॥ २९ ॥

तदुभयाभिमानीत्यत्रोभयशब्दार्थं वदन् तद्वाक्यार्थमाह—

येयं जागरितावस्था शरीरं करणाश्रयम्।
यस्तयोरभिमानी स्याद्विश्व इत्यभिधीयते ॥ ३० ॥

येयमिति। विश्वस्य स्थूलसूक्ष्मकारणशरीरत्रयाभिमानित्वात् सूक्ष्म-शरीरग्रहणाय[1] शरीरं करणाश्रयमित्युक्तं। अत एव तमश्शब्दितकारणशरीरं अपि

1. ब. सग्रहाय।

तमोऽध्यात्ममित्यत्रोक्तम्। अन्यथा जागरावस्थोक्तिप्रस्तावे तस्यानवसरप्रसङ्गात्। तच्चेह शरीरग्रहणेन गृहीतमिति बोध्यम्॥ ३०॥

ननु 'तत्कार्यं च विराड्भवे' दित्यत्र समष्टिव्यष्टिशरीरयोरभिधानात् समष्टौ च वैश्वानरशब्दितस्य वैराजस्याभिमानित्वात् कथं व्यष्टयभिमानिनो विश्वस्य तदुभयाभिमानित्वमित्यत आह—

विश्वं वैराजरूपेण पश्येद्भेदनिवृत्तये।

विश्वमिति। वैराजस्य रूपमिव रूपं यस्य सः तथा। भावप्रधानो निर्देशः, वैराजरूपत्वेनेत्यर्थः। वैराजं विश्वात्मत्वेन पश्येदित्यर्थः। हिरण्यगर्भरूपेण चिन्तयेदित्यादावप्येवमेवार्थः। यथाश्रुते विश्वस्य वैराजान्तर्भावे विश्वस्य प्राधान्यं न स्यात्। तथा च सति प्रत्यगात्मबोधनं न भवेत्। वैराजादीनामीश्वरावस्थाभेदत्वेन प्रत्यगात्मावस्थाभेदत्वाभावात्। तथा सति 'अकारमात्रं विश्वः स्यात्' 'अकारं पुरुषं विश्वमुकारे प्रविलापयेत्' इत्यादिवक्ष्यमाणा विश्वादिप्रधानव्यपदेशाः विरुध्येरन्निति। एतदुक्तं भवति — एकस्यैव चैतन्यस्य समष्टिव्यष्टयभिमानभेदेन भेदात्, जीवानामपि 'सर्वे जीवाः सर्वमयाः' इति श्रुत्या अपरिच्छेदात् परिच्छिन्नव्यष्टयभिमानकृतः परिच्छेदभ्रमः। तत्र समष्टिव्यष्टयोः स्थूलत्वसाम्येनाभेदे चिन्तिते [1]परिच्छेदाभिमाननिवृत्त्या परिच्छेदभ्रमनिवृत्तौ तदभिमानिनोरपि विश्ववैराजयोरभेददर्शनं स्यादिति॥

'एतत्त्रयमकारः' इत्यादिनोक्तम् पादानां मात्राणां चाभेदं श्रौतक्रममनुसृत्यैव, 'अकारमात्रं विश्वः स्यात्' इत्यादिना वक्ष्यामीत्यभिसंधाय अपञ्चीकृतेत्यादिनोक्तं द्वितीयपादं व्याचष्टे **ज्ञानेन्द्रियाणीत्यादिना**—

ज्ञानेन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च [2]॥ ३१॥

---

1. ब. परिच्छिन्न 2. ण्यपि।

श्रोत्रं त्वङ् नयनं [1]घ्राणं जिह्वा धीन्द्रियपञ्चकम् ।
वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियपञ्चकम् ॥ ३२ ॥

मनो बुद्धिरहङ्कारश्चित्तं चेतश्चतुष्टयम् ।
सङ्कल्पाख्यं मनोरूपं बुद्धिर्निश्चयरूपिणी ॥ ३३ ॥

अभिमानात्मकस्तद्वदहङ्कारः प्रकीर्तितः ।
अनुसन्धानरूपं च चित्तमित्यभिधीयते ॥ ३४ ॥

सङ्कल्पाख्यमिति । सङ्कल्पवृत्तिरूपेण परिणतमन्तःकरणं मनः इत्यर्थः । निश्चयाख्यवृत्तिपरिणतं च बुद्धिः । अभिमानवृत्तिपरिणतमन्तःकरणं अहङ्कारः । पूर्वोत्तरानुसंधानरूपवृत्तिमच्चित्तमित्यर्थः ॥

मनो बुद्धिरहङ्कारश्चित्तं चेति चतुष्टयम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥

इत्यभियुक्तोक्तेः । तत्र गर्वोऽभिमानः, स्मरणमनुसंधानं, विषयाः साध्या वृत्तय इत्यर्थः ॥ ३४ ॥

प्राणोऽपानस्तथा व्यान उदानाख्यस्तथैव च ।
समानश्चेति पञ्चैताः कीर्तिताः प्राणवृत्तयः ॥ ३५ ॥

खं वाय्वग्न्यम्बुक्षितयो भूतसूक्ष्माणि पञ्च च ।
अविद्याकामकर्माणि लिङ्गं पुर्यष्टकं विदुः ॥ ३६ ॥

पुर्यष्टकमिति । एकैकं पञ्चकमेकैका पुरी, मनआदिचतुष्टयमेका पुरी, कामादिकं प्रत्येकमेकैका पुरीति पुर्यष्टकं । एतच्च ज्ञानेन्द्रियादिपञ्चकं जीवस्य भोगसाधनत्वात् तदुपाधित्वेन तदवस्थानप्रदेशत्वाच्च पुरीव राज्ञः पुरीत्यर्थः ॥

---

1. अ. जिह्वा घ्राणं चेन्द्रियपञ्चकम्

'ज्ञानेन्द्रियाणि खलु पञ्च तथापराणि
कर्मेन्द्रियाणि मनआदिचतुष्टयं च ।
प्राणादिपञ्चकमथो वियदादिकं च
कामश्च कर्म च तमः पुनरष्टमी प्रूः' ॥

इत्यभियुक्तोक्तेरिति । तत्र वार्तिके अभियुक्तश्लोके च अविद्यातमश्शब्दौ पूर्वपूर्वभ्रमजन्यवासनारूपाविद्यापरौ । मूलाविद्यायाः कारणशरीरत्वेन सूक्ष्मशरीरान्तर्भावासंभवात् । पूर्वपूर्वभ्रमजन्यवासनायामप्यविद्याशब्दः प्रयुक्तो वाचस्पतिमिश्रैः 'अनिर्वाच्याविद्याद्वितयसचिवस्य' इत्यत्र । यद्यपि —

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥

इति प्राणादिसप्तदशकमेव लिङ्गशरीरमिति आत्मबोधादावुक्तम् । अत्र च कामकर्मादीनामपि लिङ्गशरीरान्तर्भाव उच्यते 'एतत्सूक्ष्मशरीरं स्यादिति' तथाप्यात्मबोधादिश्लोकेषूपलक्षणपरत्वेन कामकर्मादीनामपि ग्रहणं स्वीकर्तव्यम् । अन्यथा तेषां शरीरत्रयेऽपि अन्तर्भावाभावेन शरीरत्रयापलापेऽपि तदपलापाभावप्रसंगात् । तथा च स्थूलप्रपञ्चस्सर्वोऽपि स्थूलशरीरं, सूक्ष्मप्रपञ्चः सर्वोऽपि सूक्ष्मशरीरं, मूलप्रकृतिः कारणशरीरमिति शरीरत्रयापलापे सर्वप्रपञ्चापलापसिद्धिरिति द्रष्टव्यम् ॥ ३६ ॥

एतत्सूक्ष्मशरीरं स्यात् मायिकं प्रत्यगात्मनः ।

एतत्पुर्यष्टकं । तस्य निरसनयोग्यतां दर्शयितुं मायिकं इति विशेषणम् ।

एवं [1]सूक्ष्मशरीरं निरूप्य तस्य यस्यामवस्थायां भोगसाधनत्वं तामवस्थां दर्शयति —

करणोपरमे जाग्रत्संस्कारोत्थप्रबोधवत् ॥ ३७ ॥
ग्राह्यग्राहकरूपेण स्फुरणं स्वप्न उच्यते ।

---

1. क, नास्ति ।

करणोपरम इति । करणानां चक्षुरादीनां उपरमे सति जाग्रदनुभव-जन्यसंस्कारोत्थान्तःकरणवृत्तिरूपप्रबोधयुक्तं यद्ग्राह्यग्राहकरूपेण स्फुरणं चैतन्यमस्ति तद्विषयभूतरथगजादिः तद्विषयकान्तःकरणवृत्तिश्चेति द्वयं स्वप्न इत्यर्थः । मूले 'जागरितसंस्कारजः प्रत्ययोऽविषयः स्वप्नः' इत्युक्तत्वात्तदनुसारेणैवं व्याख्यातम् । अन्यथा चैतन्यस्य स्वप्नावस्थान्तर्भावे तस्याप्यपलापापत्तेः ॥

एवं शरीरमवस्थां चोक्त्वा तदभिमानिनं दर्शयति —

अभिमानी तयोर्यस्तु तैजसः परिकीर्तितः ॥ ३८ ॥

अभिमानीति । **तयोः** स्वप्नसूक्ष्मशरीरयोः । **तैजस** इति । तेजसि वासनायामभिमानित्वेन निर्वृत्तो भवतीति तैजस इत्यर्थः ॥ ३८ ॥

हिरण्यगर्भरूपेण तैजसं चिन्तयेद्बुधः ।

अत्र हिरण्यगर्भशब्देन समष्टिसूक्ष्मशरीराभिमानी सूत्रात्मोच्यते । यथा व्यष्टिभूतपत्रपुष्पशाखादिकं समष्टिभूतवृक्षरूपेण पश्यति एको वृक्ष इति, तथा व्यष्टिभूतसूक्ष्मशरीराभिमानिनं आत्मानं व्यष्टिसूक्ष्मशरीराभिमानं हित्वा समष्टिसूक्ष्मशरीराभिमानित्वेन ध्यायेदित्यर्थः ॥

एवं सूक्ष्मशरीरं स्वप्नावस्थां तदभिमानिनं चोकारार्थमुक्त्वा मकारार्थं वक्तुं कारणशरीरं तस्य भोगसंपादिकामवस्थां तदभिमानिनं च दर्शयति —

चैतन्याभास[1] खचितं शरीरद्वयकारणम् ॥ ३९ ॥

आत्माज्ञानं तदव्यक्तमव्याकृतमितीर्यते ।

चैतन्येति । केवलाज्ञानस्य शरीरद्वयकारणत्वासंभवाच्चैतन्याभास-**खचित**मित्युक्तम् । चैतन्यप्रतिबिम्बसहितमित्यर्थः । अत्र यदित्यध्याहारः । यच्छरीरद्वयकारणमज्ञानमस्ति तदव्यक्तमव्याकृतमितीर्यत इति संबन्धः ॥

---

2. कथितम् ।

ननु शरीरद्वयकारणत्वे तस्यार्थक्रियाकारित्वेन सत्तावश्यंभावात्तत्कार्य-शरीरद्वयस्यापि सत्तासंभवात्तदपलापो न संभवतीत्याशंक्य नार्थक्रियाकारित्वमेव सत्त्वं किं तु अबाध्यत्वं, तच्चाधिष्ठानतत्त्वज्ञानबाध्यत्वादज्ञानस्य नास्तीत्यभिप्रायेणाह —

न सन्नासन्न सदसद्भिन्नाभिन्नं न चात्मनः ॥ ४० ॥

न सदिति । तर्हि शशशृङ्गादिवदसदेव स्यादित्याशंक्याह — **नासदिति** । अज्ञोऽहमस्मीत्यपरोक्षतया प्रतीयमानत्वात् नात्यन्तमसदित्यर्थः । न च सत्त्वनिषेधेऽसत्त्वं असत्त्वनिषेधे सत्त्वं वा वक्तव्यं । परस्परविरुद्धयोरन्यतर-निषेधेऽन्यतरावश्यंभावादिति वाच्यं; परमते घटाद्यन्ताभावे घटतदत्यन्ता-भावयोरभाववत् सत्त्वासत्त्वयोरप्यभावोपपत्तिरिति भावः । तर्हि केवलसद्-सद्रूपत्वाभावेऽपि तदुभयरूपत्वं स्यादित्याशंक्याह —

न सदसदिति । एकस्यैकदैव सदसद्रूपत्वस्य विरुद्धत्वादित्यर्थः । ननु तदज्ञानमात्मनः सकाशाद्भिन्नं न वा ? भिन्नत्वे अद्वैतहानिः । अभिन्नत्वे बाध्याज्ञानाभिन्नत्वेनात्मनोऽपि बाध्यत्वापत्तिरित्यत आह — **भिन्नाभिन्नमिति** । भिन्नत्वाभिन्नत्वयोः परस्परविरुद्धयोरपि भावः पूर्ववदेव द्रष्टव्यः । यद्यपि न भिन्नं नाभिन्नं नापि भिन्नाभिन्नं कुतश्चिदित्यस्य सतोऽसतः प्रत्येकं मिळितस्य च प्रतियोगित्वमुच्यत इति आनन्दगिरीये व्याख्यातम् । तथापि वार्तिके आत्मन एव कण्ठरवेण भेदादिप्रतियोगित्वमुक्तमिति एवं व्याख्यातम् ॥ ४० ॥

ननु सत्त्वादिना निर्वक्तुमशक्यत्वेऽपि सभागत्वादिना निर्वक्तुं शक्यत एवेत्याशंक्य सभागत्वं नाम सावयवत्वं । तच्चावयवरूपकारणसमवेतत्वं । तच्चाज्ञानस्यानादित्वेन नास्तीत्याह —

न सभागं न निर्भागं न चाप्युभयरूपकम् ।
ब्रह्मात्मैकत्वविज्ञानहेयं मिथ्यात्वकारणात् ॥ ४१ ॥

न सभागमिति । तर्हि निर्भागं भविष्यतीत्याशंक्य तद्भागभूतानामंशभूतानां पृथिव्यादीनां विद्यमानत्वान्न निर्भागमित्याह — **न निर्भागमिति** । अत एव नोभयरूपत्वमित्याह — **न चापीति** ॥

ननु सर्वात्मना निर्वक्तुमशक्यत्वे तत्स्वरूपाधिगतिरेव न स्यात् । लक्षणाभावे लक्ष्याधिगतेरसंभवादित्याशंक्य सत्वादिना निर्वचनाभावेऽपि आत्मज्ञानापनोद्यत्वादिरूपेण निर्वचनं संभवतीत्याह–**ब्रह्मेति** । ब्रह्मात्मैकत्वविषयकाज्ञानस्यैवानर्थहेतुत्वात्तद्विषयकज्ञानमेव तन्निवर्तकमित्यर्थः । **हेयमिति** । नाश्यमित्यर्थः । ननु अन्यज्ञानेन अन्यस्य नाशः कथमित्याशंक्य मिथ्यात्वात् तदधिष्ठानतत्त्वज्ञानेन तदज्ञानस्य निवृत्तिः संभवतीत्याह—**मिथ्यात्वेति** ॥

एवं कारणशरीरस्य स्वरूपं निरूप्यावस्थां निरूपयति —

ज्ञानानामुपसंहारो बुद्धेः कारणतास्थितिः ।
वटबीजे वटस्येव सुषुप्तिरभिधीयते ॥ ४२ ॥

ज्ञानानामिति । अत्र ज्ञानानामिति बहुवचनात् स्थूलसूक्ष्मार्थविषयकाणां जाग्रत्स्वप्नावस्थासंबन्धिनां सर्वेषां ज्ञानानामभावो विवक्षितः । तर्हि वृत्तीनामभावे बुद्धेरप्यभावः स्यादित्याशङ्क्याह — **बुद्धेरिति** । **कारणतास्थितिरिति** । कारणात्मना ज्ञानात्मना स्थितिरवस्थानं । पुनर्बुद्ध्युत्पादनयोग्यवासनात्मना अवस्थानमित्यर्थः । उपरत[1] वृत्तिकतया बुद्धेः कारणात्मनावस्थितिः सुषुप्तिरभिधीयत इत्यर्थः । **ज्ञानानामुपसंहारो मुक्तावपीति** बुद्धेः कारणतास्थितिरित्युक्तम् । तावत्युक्ते जाग्रद्दशायामतिव्याप्तिः , कार्यदशायामपि कार्यस्य कारणरूपेणावस्थानात् अत उक्तम् — **ज्ञानानामुपसंहार इति** । तत्रानुरूपं दृष्टान्तमाह— **वटेति** ॥ ४२ ॥

अभिमानी तयोर्यस्तु प्राज्ञ इत्यभिधीयते ।

---

1. अ. वृत्तिकाया ।

जगत्कारणरूपेण प्राज्ञात्मानं विचिन्तयेत् ॥ ४३ ॥

तयोः कारणशरीरसुषुप्त्यवस्थयोः । **जगदिति** । व्यष्टिकारणशरीराभिमानिनं **प्राज्ञात्मानं** समष्टिमायावच्छिन्नेश्वरात्मना चिन्तयेदित्यर्थः ॥ ४३ ॥

ननु विश्वतैजसादीनां बहूनामङ्गीकारे चिदात्मकमेकं तत्त्वमित्यद्वैतहानिः स्यादित्याशङ्क्य तेषां भेदस्य तत्तदुपाधिकृतत्वात् स्वतश्चिदात्मनो न भेद इत्याह—

विश्वतैजससौषुप्तविराट्सूत्राक्षरात्मभिः ।
विभिन्नमिव [1] संमोहादेकं तत्त्वं चिदात्मकम् ॥ ४४ ॥

विश्वेति । अक्षरात्मभिरिति तृतीया इत्थंभावे । चिदात्मकमेकमेव तत्त्वं विश्वादिरूपेण विभिन्नमिव भासत इति शेषः । तत्र हेतुमाह — **संमोहादिति** । चिदात्मकमेकं तत्त्वमित्यज्ञानादित्यर्थः ॥ ४४ ॥

तादृशं ज्ञानं कथं भवतीत्याशङ्क्य तादृशज्ञानार्थं प्रपञ्चापलापप्रकारं दर्शयति **विश्वादिकेत्यादिना** ।

तत्र प्रथमं विश्वादीनां त्रयाणां वैराजादीनां त्रयाणां च भेदाभावसिद्ध्यर्थं ऐक्यचिन्तनं दर्शयति—

विश्वादिकं त्रयं यस्माद्वैराजादित्रयात्मकम् ।
एकत्वेनैव संपश्येदन्याभावप्रसिद्धये ॥ ४५ ॥

विश्वेति । यस्मादेवं संपश्येत्तस्मादात्मानमद्वयं पश्येदित्युत्तरेण संबन्धः । [2] तथा भेदचिन्तनेऽभेद एव भवतीत्यर्थः । तत्र प्रथमेनादिशब्देन तैजसप्राज्ञयोर्ग्रहणं द्वितीयेनादिशब्देन सूत्राक्षरात्मनोर्ग्रहणं । **एकत्वेनेति** । यथा व्यष्टिपत्रपुष्पफलशाखादिकमेको वृक्ष इति एकत्वेन पश्यति तथा

1. सम्मोहादेकं सत्त्वम् । 2. ब. नास्ति ।

व्यष्टिविश्वादीन् समष्टिवैराजात्मना पश्येदित्यर्थः। **अन्याभावेति**। अन्यत्वाभावसिद्धये इत्यर्थः॥ ४५॥

तथा च त्रयः परिशिष्टा भवन्ति। तेषां त्रयाणामपि चिदात्मनि विलापनं वक्तुं अकारादिशब्दस्याप्यपलापसिध्यर्थं, शब्दार्थयोरभेदं दर्शयति—

ओंकारमात्रमखिलं विश्वप्राज्ञादिलक्षणम्।
वाच्यवाचकताभेदाद्भेदेनानुपलब्धितः॥ ४६॥

ओंकार इति। विश्वप्राज्ञादिलक्षणमखिलमर्थजातं सर्वशब्दात्मकप्रणवमात्रं अकारोकारमकारमात्रं। तत्र च स्थूलप्रपञ्चवाचकसर्वशब्दात्मकत्वमकारस्य, सूक्ष्मप्रपञ्चवाचकसर्वशब्दात्मकत्वमुकारस्य, कारणवाचकसर्वशब्दात्मकत्वं मकारस्य च द्रष्टव्यम्। एतत्सर्वं माण्डूक्यभाष्यादौ स्पष्टमुक्तम्। सर्वशब्दात्मकत्वं च प्रणवस्य तद्यथा शंकुनेत्यादि छान्दोग्योपनिषदि स्पष्टमुक्तम्। तत्र हेतुमाह—**वाच्यवाचकतेति**। भवितृप्रधानो निर्देशः। वाच्यवाचकाभेदादित्यर्थः। वाच्यवाचकाभेदे हेतुमाह—**भेदेनेति**। वाच्याद्भेदेन वाचकस्य, वाचकाद्भेदेन वाच्यस्यानुपलब्धेरित्यर्थः। वाच्यवाचकाभेदो माण्डूक्योपनिषद्भाष्यादौ सम्यङ्निरूपित इति नेह प्रपञ्च्यते॥ ४६॥

एवं सामान्यतः प्रणवतदर्थयोरभेदमुक्त्वा इदानीं विशिष्य प्रणवावयवानां तदर्थानां चाभेदं दर्शयति—

अकारमात्रं विश्वः स्यादुकारस्तैजसः स्मृतः।
प्राज्ञो मकार इत्येवं परिपश्येत्क्रमेण तु॥ ४७॥

अकारमात्रमिति॥ ४७॥

एवं समाधिकालपूर्वकृत्यमुक्त्वा समाधेरव्यवहितपूर्वकालकर्तव्यं प्रविलापनप्रकारमाह—

समाधिकालात्प्रागेवं विचिन्त्यातिप्रयत्नतः ।
स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेत् ॥ ४८ ॥

समाधीति । विश्वविराजाद्यभेददृष्टीनां प्रणवावयवतदर्थाभेददृष्टीनां चासुलभत्वादतिप्रयत्नत इत्युक्तम् ॥ ४८ ॥

स्थूलादिक्रमेण सर्वं चिदात्मनि विलापयेदिति संक्षेपेणोक्तं विलापनप्रकारं विशिष्य दर्शयति —

अकारं पुरुषं विश्वमुकारे प्रविलापयेत् ।
उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत् ॥ ४९ ॥

मकारं कारणं प्राज्ञं चिदात्मनि विलापयेत् ।

अकारमिति । उकारे प्रविलापयेदिति । अकार उकार एवेत्येवंप्रकारेणेत्यर्थः । **मकारे प्रविलापयेदिति** । उकारो मकार एवेति प्रकारेणेत्यर्थः । **प्राज्ञं चिदात्मनि विलापयेदिति** । मकारोऽहमेवेत्येवंप्रकारेणेत्यर्थः । एवं च मकार ओंकार एव । ओंकारोऽहमेवेति पाठान्तरं वार्तिकानुगुणमेवेति वेदितव्यम् । तादृशपाठस्य सर्वोपनिषद्व्याख्यानाननुगुणत्वात् । प्रपञ्चस्तु पञ्चीकरणभावप्रकाशिकायां द्रष्टव्यः ॥

एवं चिदात्मनि विलापयेदिति सर्वप्रपञ्चप्रविलापनमुक्त्वा चिदात्मा कीदृश इत्याकांक्षायां चिदात्मस्वरूपं कथयन् संप्रज्ञातसमाधिप्रकारमाह —

चिदात्माहं नित्यशुद्धबुद्धमुक्तसदद्वयः ॥ ५० ॥

परमानन्दसन्दोहो वासुदेवोऽहमोमिति ।

चिदात्मेति । अत्र च वाक्यद्वयाङ्गीकारात् पूर्वोत्तरार्धयोरहमित्यस्य न पौनरुक्त्यं । नित्यपदं शुद्ध इत्यादिषु सर्वत्रान्वेति नित्यशुद्धो नित्यबुद्धो

नित्यमुक्तो, नित्यसद्रूपो नित्यमद्वयरूप इति । तथा च शुद्धत्वादीनां कादाचित्कत्वं निरस्तम् । एतादृशचिदात्मरूपस्य इष्यमाणत्वे हेतुं दर्शयति— **परमेति** तस्य पूर्णतां दर्शयति **वासुदेव इति** ॥

सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ।
ततस्स वासुदेवेति विद्वद्भिः परिपठ्यते ॥

इति विष्णुपुराणवचनात्तस्य पूर्णत्वार्थकत्वादित्यर्थः परमानन्दसन्दोहश्चासौ वासुदेवश्चेति समानाधिकरणसमासः । आनन्दमन्दोहरूपत्वं च सर्वेषामानन्दानां ब्रह्मानन्देऽन्तर्भावादिति द्रष्टव्यम् । वासुदेवस्य प्रणवार्थत्वात् प्रणवाभिन्नत्वादोमित्यस्य तद्वाचकवासुदेवादिशब्दैः सामानाधिकरण्यं द्रष्टव्यम् । अथवा पूर्वार्धोक्तस्य महावाक्यार्थस्य स्वानुभवेनाङ्गीकारार्थो वा ओमिति ॥

एवं शब्दानुविद्धसंप्रज्ञातसमाधिमुक्त्वाऽसंप्रज्ञातसमाधिं वक्तुं संप्रज्ञातसमाधिरूपवृत्तिविलयप्रकारमाह —

ज्ञात्वा [1] विवेचितं चित्तं तत्साक्षिणि विलापयेत् ॥ ५१ ॥

ज्ञात्वेति । बहुकालं संप्रज्ञातसमाधौ स्थित्वेत्यर्थः । **तत्साक्षिणीति** । विवेचकचित्तसाक्षिणीत्यर्थः ॥ ५१ ॥

इदानीमसंप्रज्ञातसमाधिमाह —

चिदात्मनि विलीनं [2] चेत्तच्चित्तं न विचालयेत् ।
पूर्णबोधात्मनाऽऽसीत पूर्णाचलसमुद्रवत् ॥ ५२ ॥

चिदात्मनीति । पुनः किं कुर्यादित्यत आह—**पूर्णेति** । तत्र दृष्टान्तमाह— **पूर्णेति** । न चलतीत्यचलः । पूर्णः अचलश्च योऽयं समुद्रः तद्वदासीतेत्यर्थः ॥ ५२ ॥

---

1. विवेचनं 2. च तच्चित्तं

एवं समाधिप्रकारमुक्त्वा तत्परिपाकफलभूततत्त्वसाक्षात्कारप्रकारं दर्शयति —

एवं समाहितो योगी श्रद्धाभक्तिसमन्वितः ।
जितेन्द्रियो जितक्रोधः पश्येदात्मानमद्वयम् ॥ ५३ ॥

एवमिति । एवमुक्तप्रकारेण **समाहितः** समाधियुक्तो **योगी** तत्परिपाकानन्तरं **अद्वयमात्मानं** पश्येत् । ज्ञाने विध्यसंभवात् साक्षात्करोतीत्यर्थः । ज्ञाने विध्यसंभवे तादृशसाक्षात्कारोत्पत्त्यर्थं समाधिकालेऽपि श्रद्धाभक्तीन्द्रियजयक्रोधजयादीनामावश्यकतां दर्शयति **श्रद्धेत्यादिना** ॥५३॥

ननु लौकिकं व्यापारं विहाय सर्वदा तत्त्वनिष्ठारूपसमाधिः कर्तुं न शक्यत इत्याशङ्क्याधिकारिविशेषणीभूतवैराग्यस्यैव दार्ढ्याय समाधिदशायामपि वैराग्यं दर्शयति —

आदिमध्यावसानेषु दुःखं सर्वमिदं यतः ।
तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवेत्सदा ॥ ५४ ॥

आदीति । आदौ भोगसाधनीभूतद्रव्यार्जने दुःखं, मध्ये तत्परिपालने दुःखं, अवसाने तन्नाशे दुःखमित्येवंप्रकारेण सर्वमपि सर्वदा दुःखहेतुरेव । एवं ब्रह्मलोकान्तलोकसाधनकर्माद्यार्जनमपि दुःखहेतुरेवेति निश्चित्य सातिशयानित्यफलसाधनं सर्वं परित्यज्य नित्यनिरतिशयपुरुषार्थसिद्ध्यर्थं सर्वदा तत्त्वनिष्ठारूपसमाधिमान् भवेदित्यर्थः ॥ ५४ ॥

एवं समाधिनिष्ठया तत्त्वसाक्षात्कारलाभे किं फलं भवतीत्याशंक्य **कृतकृत्यता** भवतीत्याह —

यः पश्येत्सर्वगं शान्तमानन्दात्मानमद्वयम् ।
न तेन किंचिदाप्तव्यं ज्ञातव्यं वावशिष्यते ॥ ५५ ॥

कृतकृत्यो भवेद्विद्वान् जीवन्मुक्तो भवेत्सदा ।
आत्मन्यारूढभावस्तु जगदेतन्न वीक्षते ॥ ५६ ॥

कदाचिद्व्यवहारेषु द्वैतं यद्यपि पश्यति ।
बोधात्मव्यतिरेकेण न पश्यति चिदन्वयात् ॥ ५७ ॥

य इति । सर्वत्र परिपूर्णपरमानन्दाद्वयब्रह्मरूपं आत्मानं साक्षात्कुर्वतः सर्वानन्दानां ब्रह्मानन्द एवान्तर्भावादाप्तव्यान्तरं नास्ति । 'यस्मिन्विज्ञाते सर्वमिदं विज्ञातं स्यादिति' ज्ञातव्यान्तरमपि नास्तीत्यतः कृतकृत्यो भवतीत्यर्थः । **कृतकृत्यो** भवेदित्यस्य विवरणं **जीवन्मुक्तो भवेदिति** । **सदेति** — सदा समाधिकाले तदितरभिक्षाटनादिव्यवहारकाले चेत्यर्थः । अन्यथा जीवन्मुक्तत्वस्य ज्ञानात्पूर्वकाले विदेहकैवल्यकाले चाभावेन विरोधात् । अत एव समाधिकाले तदितरभिक्षाटनादिव्यवहारकाले द्वैतदर्शनेऽपि तस्य मिथ्यात्वेनैव दर्शनान्न जीवन्मुक्तनाया विरोध इति दर्शयति — **कदाचिदिति** । बद्धजनसाधारणद्वैतदर्शनमङ्गीकरोति–**द्वैतं यद्यपि पश्यतीति** । तर्हि बद्धजनात्को विशेष इत्यत आह–**बोधात्मेति** । बद्धजनः सर्वदा द्वैतं पश्यति । विद्वांस्तु कदाचित्समाधिव्यतिरिक्तकाल एव, इत्येको विशेषः । अपरस्तु, बद्धजनो बोधात्मव्यतिरेकेण द्वैतं सत्यतया पश्यति, विद्वांस्तु सत्यतया न पश्यति । तत्र हेतुः–**चिदन्वयादिति** । सर्वत्र प्रपञ्चे चित एव सत्ताप्रदत्वेनानुस्यूतत्वज्ञानादित्यर्थः ॥ ५७ ॥

विद्वान् द्वैतं सत्यतया न पश्यतीत्युक्तं, कथं पुनः पश्यतीत्याह—

किं तु पश्यति मिथ्यैव दिङ्मोहेन्दुविभागवत् ।

किन्त्विति । शुद्धाद्वितीयब्रह्मणः प्रपञ्चाकारत्वस्य मिथ्यात्वे दृष्टान्तमाह— **दिङ्मोहेति** । प्राच्यादीनां प्रतीच्यादिप्रतिपत्तिवदित्यर्थः । एकस्यैव ब्रह्मणो देवतिर्यङ्मनुष्यादिरूपेण भेदस्य मिथ्यात्वे दृष्टान्तमाह— **इन्दुरिति** ।

यथा एकस्यैवेन्दोर्भेदेन भानं नेत्रावष्टम्भाद्यपाधिवशात्तथैकस्यैव ब्रह्मणस्तत्तदुपाधिवशादेवतिर्यङ्मनुष्यादिरूपेण भेदभानमित्यर्थः ॥

ननु तत्त्वसाक्षात्कारानन्तरमज्ञाननाशेऽपि पुनश्शरीरादिप्रतिभासाङ्गीकारेऽनिर्मोक्ष एव स्यादित्याशङ्क्य तस्यावधिमाह—

प्रतिभासश्शरीरस्य तदाऽऽप्रारब्धसंक्षयात् ॥ ५८ ॥

प्रतिभास इति । तदा ज्ञानकालेऽपि **शरीरस्य प्रतिभासः आप्रारब्धसंक्षयादिति** च्छेदः । मर्यादायामाङ् प्रारब्धसंक्षयपर्यन्तं । तन्नाशे तु शरीरादिप्रतिभासोऽपि नश्यतीत्यर्थः । तदुक्तमभियुक्तैः —

शास्त्रेण नश्येत्परमार्थरूपं कार्यक्षमं नश्यति चापरोक्ष्यात् ।
प्रारब्धनाशात् प्रतिभासनाश एवं त्रिधा नश्यति चात्ममाया ॥ इति ।

अस्मिन्नर्थे श्रुतिं प्रमाणयति —

तस्य तावदेव चिरमित्यादि श्रुतिरब्रवीत् ।

तस्येति । तस्य ज्ञानिन**स्तावदेव** तावत्पर्यन्तमेव **चिरं** विलम्बः यावत्प्रारब्धकर्मणा न विमोक्ष्ये न विमोक्ष्यते । **अथ** प्रारब्धकर्मविमोचनानन्तरं **संपत्स्ये** संपद्यते । लकारपुरुषव्यत्ययश्छान्दसः । ज्ञानेनाज्ञानस्यावरणशक्तिनाशेऽपि तत्कृतो विक्षेपः कंचित्कालं चक्रभ्रमिन्यायेन, परमते तन्त्वादिनाशानन्तरमपि पटादिवच्चानुवर्तत इति भाव ॥

तर्हि विदुषो बद्धजनस्येव शरीरादिप्रतिभासांगीकारे तत्कृतसुखदुःखादिकमपि स्यादित्याशंक्य तस्य मिथ्यात्वेन ज्ञातत्वान्न दुःखादिहेतुत्वमित्याह —

प्रारब्धस्यानुवृत्तिस्तु मुक्तस्याभासमात्रतः ॥ ५९ ॥

सर्वदा मुक्त एव स्यात् ज्ञाततत्त्वः पुमानसौ।

प्रारब्धस्येति। प्रारब्धस्य प्रारब्धकार्यस्य शरीरादेरित्यर्थः। **मुक्तस्य** जीवन्मुक्तस्य **आभासमात्रतः** प्रतीतिमात्रान्न तु वस्तुतोऽनुवृत्तिरस्तीत्यर्थः। तथा च — यथा सर्पभ्रमानन्तरं रज्जुतत्त्वं ज्ञाततः अतिसादृश्याद्रज्ज्वाः सर्पाकारतया प्रतीतावपि न भयकम्पादीनि एवं जीवन्मुक्तस्य शरीरादिप्रतीतावपि मिथ्यात्वेन ज्ञानान्न दुःखादिहेतुत्वमिति भावः। तत्र हेतुमाह—**सर्वदेति।** ज्ञाततत्त्वः पुमान् सर्वदा समाधिकाले तदितरव्यवहारकाले च मुक्त एव। 'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुत्या ज्ञानसमकालमेव मुक्तेः सिद्धत्वात्। ततो विदुषः शरीरादिप्रतिभासेऽपि न दुःखादिप्रसक्तिरिति भावः॥

प्रारब्धक्षयानन्तरं विदेहकैवल्यप्राप्तिप्रकारमाह—

प्रारब्धभोगशेषस्य संक्षये तदनन्तरम्॥ ६०॥

अविद्यातिमिरातीतं सर्वाभासविवर्जितम्।
आनन्दममलं शुद्धं मनोवाचामगोचरम्॥ ६१॥

प्रारब्धेति। अविद्या शास्त्रेण नश्येदित्यादिश्लोकेनोक्ता त्रिविधा, सैव तिमिरं वस्तुस्वरूपाच्छादकत्वात् **तदतीतं** निवृत्ताविद्यकमित्यर्थः। कारणाभावमुक्त्वा कार्याभावमप्याह—**सर्वेति।** आभास्यन्त इत्याभासाः शरीरादयः तद्वर्जितमित्यर्थः। अविद्यातिमिरातीतत्वादेवामलं सर्वाभासविवर्जितत्वादेव **शुद्धम्।** अत एव केवलानन्दरूपं। तस्यापरिमिततां दर्शयति—**मन इति।** मनांसि वाचश्च मनोवाचः तासामगोचरं अपरिमितत्वादित्यर्थः॥ ६१॥

तदानीं तत्स्वरूपप्रतिपत्त्यर्थं शब्दाद्यन्वेषणव्यावृत्त्यर्थमाह —

वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम्।
प्रज्ञानघनमानन्दं वैष्णवं पदमश्नुते॥ ६२॥

वाच्येति । तदशायामिष्टानिष्टपरिहारार्थं प्रवृत्त्यादिकं वारयति — **हेयेति** । आनन्दस्याज्ञायमानस्य पुरुषार्थत्वाभावादाह — **प्रज्ञानघनमानन्दमिति** । स्वप्रकाशतया ज्ञायमानानन्दरूपमित्यर्थः । प्रज्ञानघनमित्यनेन भाट्टादिमत इव चिदचिदात्मकं न भवति, किं तु केवलज्ञानस्वरूपमेवेति दर्शितम् । आनन्दस्वरूपस्यात्यन्तमभिलषितत्वात् पुनर्वचनम् । विष्लृ व्याप्ताविति विषिधातु निष्पन्नत्वात् विष्णुशब्देन त्रिविधपरिच्छेदरहितं ब्रह्मोच्यते । विष्णोरिदं **वैष्णवं** ब्रह्मस्वरूपं राहोश्शिर इत्यादिवदभेदेऽपि भेदोपचारः । पश्यत इति **पदं अश्नुते** प्राप्नोति । ब्रह्मस्वरूपो भवतीत्यर्थः । न तु विष्णोः पदं वैकुण्ठाख्यं लोकं प्राप्नोति । तस्योपासनाफलत्वेन तत्त्वसाक्षात्कारफलत्वासंभवात् । ब्रह्मसाक्षात्कारस्य 'ब्रह्म वेद ब्रह्मैव भवती'त्यादिश्रुत्या ब्रह्मैक्यप्राप्तिफलकत्वादिति भावः ॥ ६२ ॥

एवं मुमुक्ष्वनुग्रहार्थं कृतस्य प्रकरणस्यार्थग्रहणे प्रकारमाह —

इदं प्रकरणं यत्नात् ज्ञातव्यं भगवत्तमैः ।
अमानित्वादिनियमैर्गुरुभक्तिप्रसादतः ॥ ६३ ॥

इदमिति । इदं पञ्चीकरणवार्तिकरूपं **प्रकरणं यत्नात्** गुरुशुश्रूषादियत्नपूर्वकं **ज्ञातव्यं** अर्थतो ज्ञातव्यं, मुमुक्षुभिरिति शेषः । कीदृशैर्गुरुभिर्ज्ञातव्यमित्यत आह — **भगवत्तमैरिति** । वेदान्तजन्यज्ञानवन्तो भगवन्तः तेषां भगवद्रूपत्वात् । तत्त्वसाक्षात्कारवन्तस्तु भगवत्तमास्तैर्निमित्तैस्तान् गुरून् कृत्वेत्यर्थः । 'गुरुभिर्ज्ञात्वा गुरूणां मत'मित्यादिदर्शनात् । पुनः कीदृशैरित्यत आह — **अमानित्वादीति** । अमानित्वादयः अमानित्वमदम्भित्वमित्यादि भगवद्गीतोक्ता नियमा येषां तैरित्यर्थः । 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठ'मित्यादिश्रुतेः । एवंविधा गुरव प्राप्या इत्यर्थः । न च तादृशाः कृतकृत्यतया किमर्थं मामुपदिशन्तीति वाच्यम् । 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्व-

दर्शिनः ॥' इति गीतावचनात् तादृशा अपि केवलं कृपया उपदिशन्तीति भावः । **गुरुभक्तीति** । गुर्वी च सा भक्तिश्चेति गुरुभक्तिस्तया यः प्रसादः, गुरूणामनुग्रहस्तस्मात् ज्ञातव्यमित्यर्थः । गुरुषु भक्तिरिति वा ॥ ६३ ॥

एवं विशिष्टगुर्वनुग्रहादिदं प्रकरणमर्थतो ज्ञात्वा किं कर्तव्यमित्यत आह —

इमां विद्यां प्रयत्नेन योगी संध्यासु सर्वदा ।
समभ्यसेदिहामुत्रभोगानासक्तधीस्सुधीः ॥ ६४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीमच्छंकरभगवत्पादशिष्य श्रीसुरेश्वराचार्यविरचितं पञ्चीकरणं संपूर्णम् ॥

इमामिति । विद्यां विद्याहेतुभूतमिदं प्रकरणमित्यर्थः । उपनिषच्छब्दवाच्यविद्याहेतुभूतवेदान्तवाक्येषु उपनिषच्छब्दवद्द्रष्टव्यम् । **प्रयत्नेनेति** । लोकवार्तादिविघ्ना यथा न स्युस्तथा प्रयत्नं कृत्वेत्यर्थः । **संध्यासु** सायंप्रातः संध्यासु **समभ्यसेत्** सम्यगभ्यसेत् अर्थानुसंधानपूर्वकं जपेदित्यर्थः । तत्राधिकारिणं दर्शयति—**इहेति** । वैराग्यं साधनचतुष्टयसंपन्न्युपलक्षणार्थः । **सुधीरिति** श्रवणमननजन्यज्ञानवानित्यर्थः । कृतश्रवणमननस्यैव निदिध्यासनेऽधिकारादिति ।

अनया पञ्चीकरणवार्तिकाभरणरूपया कृत्या ।
श्रीकृष्णः प्रीतो भवतादिबुधाश्चैनां समीक्ष्य मोदन्ताम् ॥

इति शम् ॥ ६४ ॥

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीकैवल्येन्द्रसरस्वतीपूज्यपादशिष्य श्रीमज्ज्ञानेन्द्रसरस्वती पूज्यपादशिष्य **श्रीमदभिनवनारायणेन्द्रसरस्वतीभिः** विरचितं पञ्चीकरणवार्तिकाभरणं समाप्तम् ॥

॥ श्लोकानुक्रमणिका ॥

	पृ-सं
अ	
अकारं पुरुषं विश्व	26
अकारमात्रं विश्वः	25
अधिदैवतमध्यात्म	12
अभिमानात्मकस्तद्व	19
अभिमानी तयोर्यस्तु	23
अविद्यातिमिरातीतं	31
अहंकारस्तथाध्यात्म	17
आ	
आत्माज्ञानं तदव्यक्त	21
आदिमध्यावसानेषु	28
आपो रसात्मिकाः	7
आसीदेकं परं ब्रह्म	5
इ	
इदं प्रकरणं यत्नात्	32
इन्द्रियैरर्थविज्ञानं	12
इमां विद्यां प्रयत्नेन	33
उ	
उपस्थेन्द्रियमध्यात्मं	16
ए	
एकैकं भागमेकस्मिन्	10
एतत्सूक्ष्मशरीरं स्यात्	20
एवं समाहितो योगी	28
ओ	
ओंकारमात्रमखिलं	25
ओंकारस्सर्ववेदानां	4
क	
कदाचिद्व्यवहारेषु	29
किंतु पश्यति मिथ्येव	,,
कृतकृत्यो भवेद्विद्वान्	,,
ख	
खं वाय्वग्न्यम्बु	19
ग	
ग्राह्यग्राहकरूपेण	20
घ	
घ्राणमध्यात्ममित्युक्तं	15
च	
चक्षुरध्यात्ममित्युक्तं	14
चित्तमध्यात्ममित्युक्तं	17
चिदात्मनि विलीनं चेत्	27
ज	
जिह्वाध्यात्मं तथा	14
ज्ञानानामुपसंहारो	28

	पृ-सं
त	
ततः स्थूलानि भूतानि	9
तमोऽध्यात्ममिति प्रोक्तं	17
तस्मादाकाशमुत्पन्नं	7
तस्य तावदेव चिर	30
त्वगध्यात्ममिति प्रोक्तं	14
न	
न सभागं न निर्भागं	22
प	
पञ्चीकृतानि भूतानि	11
परमानन्दसन्दोहो	26
पादावध्यात्ममित्युक्तं	16
पायुरिन्द्रियमध्यात्मं	,,
पृथिव्यादीनि भूतानि	10
प्राणोऽपानस्तथा व्यान	19
ब	
बाह्यान्तःकरणैरेवं	17
बुद्धिरध्यात्ममित्युक्तं	16
म	
मकारं कारणं प्राज्ञं	26
मनोऽध्यात्ममिति प्रोक्तं	16
मनो बुद्धिरहंकार	19
य	
यः पश्येत् सर्वगं शान्त	28
येयं जागरितावस्था	17
व	
वागध्यात्ममिति प्रोक्तं	15
वाच्यवाचकनिर्मुक्तं	31
वाय्वादिभागाश्चत्वारो	10
विश्वं वैराजरूपेण	18
विश्वतैजससौषुप्त	24
विश्वादिकं त्रयं यस्मा	,,
श	
शब्दस्पर्शरूपगुणै	7
शब्दस्पर्शरूपरस	,,
श्रोत्रं त्वङ्नयनं	19
श्रोत्रमध्यात्ममित्युक्तं	13
स	
समाधिकालात्प्रागेवं	26
सर्वदा मुक्त एव स्यात्	31
ह	
हस्तावध्यात्ममित्युक्तं	16
हिरण्यगर्भरूपेण	21

—❀—